# ShANmAturastavam

# ષાણ્માતુરસ્તવમ્

## Document Information

Text title : ShANmAturastavam

File name : ShANmAturastavam.itx

Category : subrahmanya, aShTaka

Location : doc_subrahmanya

Transliterated by : Shankara and P. S. Ramachandran

Proofread by : Shankara, PSA Easwaran

Latest update : December 11, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 11, 2020

*sanskritdocuments.org*

# ષાણ્માતુરસ્તવમ્

શ્રીગણેશાય નમઃ ।
ગૌરીસહાયસુહૃદ્દૂરીકૃતાવયવભૂરીષુ વૈરિષુ તમ-
સ્સૂરીકૃતાયુધનિવારીતદોષ નિજનારીકલાલસમનઃ ।
ક્રૂરીભવત્તિમિરચારી હિતાપદુરરી નીતિસૂરિ કરુણા-
વારીણવારિધર, ગૌરીકિશોર, મમ દૂરીકુરુષ્વ દુરિતમ્ ॥ ૧॥

મલ્લીકૃતત્રિદશમલ્લીસદા સુદતિવલ્લીકુચાઙ્કુણલસત્
સલ્લીનકુઙ્કુમરસોલ્લીનવત્સ, યુધિ ભલ્લીસ્મયોઽસિ દિતિજૈઃ ।
ફુલ્લીકુરુષ્વ સ ચ વલ્લીતગોધિતલવલ્લીવિલોલબુધહૃદ્-
વલ્લીનિવાસ, મમ સોલ્લીનકેકિ હયસલ્લીલપાહૃદુદજમ્ ॥ ૨॥

પ્રાણીકૃતસ્વનખરાણીતભક્તજનવાણીશમુખ્યસુમન-
શ્શ્રેણીસુજાનુતલતૂણીતમાલતિમિરાણીલચૂચુકભરા ।
વાણીવિલાસમલિવેણીવિપઞ્ચિમૃદુવાણી તવાંગરમણી
શ્રોણીઘના સુમતિ, શાણીતનોતુ ભૃશમેણીવિશાલનયના ॥ ૩॥

રાગાભિષિક્તનિજકેશાદિપાદવપુરાશાપિશાચદહના
શ્રીશાતકુંભનિભપાશાઙ્કુશાભરણનાશાન્તકાનુચર! ભોઃ ।
ભીશાઙ્કુલાહરણગોશાબકાવનતકોશાધિપાશુ ભગવન્
પાશાટવી ભવ હૃતાશાશયાવપિશિતાશા હિ ભોગભુગમુમ્ ॥ ૪॥

સન્તાપસન્તતિનિશાન્તાવસન્તમયિ કાન્તાયુગાન્તરરતે,
કિન્તાવકે હૃદિ નિતાન્તાકુલાશયમહન્તાનપેતમવિતુમ્ ।
કિન્તામસં ભવસિ, ચિન્તામણીરુચિરસન્તાનપાદપદવ-
શ્ચિન્તાધુતાન્તરુજમન્તાદિહીન કુરુ માન્તાવકીનભજનમ્ ॥ ૫॥

સીમાવિહીનગુણ સોમાવચૂડ જિતકામાભિમાન સુમતે!
ભૂમાધવાદિનુત ભૂમાસમાન, પુરકામાન્ધકાન્તકગુરો ।
નામાલિજાપિજનકામાવસાનફલદામાશમાતનુ વિભો,

હેમારુણાહિતનિકામાતિભીમ, ગુહ સામાદિ વેદવિદયમ્ ॥ ૬॥

વેદાનુગીતનુતપાદારવિન્દયુગમાદાય સેવનવિધે-
રાદાવમું સરસમાદાતુકામ શુભકેદારકેલિનિલયે ।
તાદાત્મ્યલીનમતિસાદાપનોદ, સકલાદાનદૈવતતરો
ભૂદાસકલ્પલતિકોદારદામ કુરુ મોદાંબુરાશિવસતિમ્ ॥ ૭॥

કિઞ્ચાસુરદ્વિરદપઞ્ચાનનપ્રણવસઞ્ચારિહંસસમને
કિઞ્ચાપલન્નમન, તુઞ્ચાનુજીવિ મમ સિઞ્ચામૃતાભ કૃપયા ।
પઞ્ચાનનપ્રણય કઞ્ચાપિ શાસિકતિ મુઞ્ચાશુ બદ્ધકમતિં
પઞ્ચાશુગારિસુરપઞ્ચાનનાત્મજમિમઞ્ચાપિ પાહિ સતતમ્ ॥ ૮॥

કાલાનલોપમિત ફાલાવલોકનક
blank. Missing line
વેલયુધો મહતિ કોલાહલારવસુલીલા તનોતુ કુશલમ્ ॥ ૯॥

ઇતિ શ્રીનારાયણગુરુવિરચિતં ષાણ્માતુરસ્તવં સમ્પૂર્ણમ્ ।

Encoded by Shankara and P. S. Ramachandran
Proofread by Shankara, PSA Easwaran

*ShANmAturastavam*
pdf was typeset on December 11, 2020

Please send corrections to *sanskrit@cheerful.com*